श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्लोकद्वयं श्लोकत्रयं च ॥

*This document* has been prepared by*

***Sunder Kidāmbi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्लोकद्वयं श्लोकत्रयं च ॥

## ॥ श्लोकद्वयम् ॥

ग्राहग्रस्ते गजेन्द्रे रुवति सरभसं तार्क्ष्यमारुह्य धावन्
व्याघूर्णन् माल्यभूषावसनपरिकरो मेघगम्भीरघोषः।
आबिभ्राणो रथाङ्गं शरमसिमभयं शङ्खचापौ सखेटौ
हस्तैः कौमोदकीमप्यवतु हरिरसावंहसां संहतेर्नः॥ १ ॥

नक्राक्रान्ते करीन्द्रे मुकुलितनयने मूलमूलेति खिन्ने
नाऽहं नाऽहं नचाऽहं न च भवति पुनस्तादृशो मादृशेषु।
इत्येवं त्यक्तहस्ते सपदि सुरगणे भावशून्ये समस्ते
मूलं यत्प्रादुरासीत् स दिशतु भगवान् मङ्गळं सन्ततं नः॥ २ ॥

## ॥ श्लोकत्रयम् ॥

प्रातस्स्मरामि भवभीतिमहार्तिशान्त्यै
नारायणं गरुडवाहनमञ्जनाभम्।
ग्राहाभिभूतमदवारणमुक्तिहेतुं
चक्रायुधं तरुणवारिजपत्रनेत्रम्॥ १ ॥

प्रातर्नमामि मनसा वचसा च मूर्ध्ना
पादारविन्दयुगळं परमस्य पुंसः।
नारायणस्य नरकार्णवतारणस्य
पारायणप्रवणविप्रपरायणस्य॥ २ ॥

प्रातर्भजामि भजतामभयङ्करं तं
प्राक्सर्वजन्मकृतपापभयापनुत्यै।

www.prapatti.com

यो ग्राहवक्त्रपतिताङ्घ्रि गजेन्द्रघोर-
 शोकप्रणाशनकरो धृतशङ्खचक्रः॥ ३॥

श्लोकत्रयमिदं पुण्यं प्रातरुत्थाय यः पठेत्।
लोकत्रयगुरुस्तस्मै दद्यादात्मपदं हरिः॥ ४॥

॥ इति श्लोकद्वयं श्लोकत्रयं च॥

www.prapatti.com